संस्कृतवार्ता:

दिनाङ्क :- 09.06.2025 सायम् :- 06:20

आदौ-मुख्यवार्ता:

- केन्द्रे एनडीए-प्रशासनस्य एकादशवर्षपूर्त्तौ प्रधानमन्त्रिणा मोदिना सबलं प्रोक्तं यत् सबका साथ, सबका विकास, सबका विश्वास, सबका प्रयास इत्येतादृशैः मार्गदर्शक-सिद्धान्तैः केन्द्रेण पथप्रदर्शक-परिष्काराः विहिताः।
- केन्द्रीयमन्त्रिणा जेपी-नड्डा इत्यमुना प्रोदीरितं यत् प्रधानमन्त्रिणः नेतृत्वे सर्वकारेण प्रदर्शनाधारित-राजनीतिं संस्थाप्य देशस्य राजनैतिकसंस्कृतिः परिवर्तिता।
- वाणिज्योद्योगमन्त्री पीयूषगोयलः अद्य आर्थिकव्यापार-सहभागितां सुदृढीकर्तुं स्विट्जलैण्ड्-स्वीडेन्-देशयोः यात्राम् आरब्धवान्।
- भारत-ऋतुविज्ञान-विभागेन जम्मू-कश्मीरं समेत्य उत्तरभारतस्य विभिन्नेषु स्थलेषु लू इति तापतरङ्गस्य स्थितेः संभावना प्रकटिता।
- अमेरीकायां व्याप्तस्य आप्रवासन-अभियानस्य विरुद्धं नवीनतम-प्रदर्शनेषु लॉस-एन्जलिस-नगरस्य मध्यभागे सहस्राधिकाः आन्दोलनकारिणः नैशनल गार्ड्स इति राष्ट्रिय-रक्षक-सैनिकैः सह संघर्षं कृतवन्तः।

--------------------------------

प्रधानमन्त्री-सर्वकारीयैकादशवर्षाणि

प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् देशेन विगतेष्वेकादशवर्षेषु विभिन्नक्षेत्रेषु तीव्रपरिवर्तनमवलोकितम् । सहैव एतत् चत्त्वारिंशदधिकैकशत-भारतीयानां सामूहिक-प्रयासस्य प्रतिफलमस्ति। केन्द्रे एनडीए-प्रशासनस्य एकादशवर्षपूर्त्तौ प्रधानमन्त्रिणा मोदिना सबलं प्रोक्तं यत् सबका साथ, सबका विकास, सबका विश्वास, सबका प्रयास इत्येतादृशैः मार्गदर्शक-सिद्धान्तैः केन्द्रेण पथप्रदर्शक-परिष्काराः विहिताः। सामाजिकान्तर्जालीय-सन्देशे श्रीमोदिना कथितं यत् केन्द्रेण आर्थिक-विकासादारभ्य सामाजिकोत्थानं यावत् जनकेन्द्रित-सर्वाङ्गीणप्रगतये ध्यानमाकर्षितम् । प्रधानमन्त्रिणा प्रोक्तं यत् अद्य देशः न केवलं प्रमुखार्थव्यवस्था वर्तते अपितु जलवायु- कार्याचरणे, प्राविधिक-नवाचारे, महत्वपूर्णप्रकरणेषु च

वैश्विकस्तरे विशिष्टस्थानमावहति। प्रधानमन्त्रिणा नमो-ऐप इति तन्त्रांशे उपलब्ध-चलचित्राणां, लेखानां विभिन्नाकर्षकप्रारूपाणां माध्यमेन भारत-विकासयात्रायाः अवगमनार्थं जनाः आमन्त्रिताः। मञ्चेऽस्मिन् आकाशवाणी महत्वपूर्णक्षेत्रेषु सर्वकारस्य प्रयासान् प्रकाशयति ।

---------------------------------

एपीएम-सर्वेयः : १.

प्रधानमन्त्रिणा नरेन्द्रमोदिना विगतैकादश वर्षेषु भारतस्य विकासयात्रायाः विषये NaMo App इत्यस्य सर्वेक्षणे भागं ग्रहीतुं सर्वेऽपि आमन्त्रिताः । श्रीमोदी स्वस्य सामाजिकान्तरजालीयपटले पोर्टल्-लिङ्क् इत्यपि प्रसारितवान् यत्र यःकोऽपि विगतैकादशवर्षेषु भारतस्य विकास-यात्रायाः विषयेऽवगन्तुं जन-मन-सर्वेक्षणे भागं ग्रहीतुं शक्नोति।

---------------------------------

जेपी-नड्डा

केन्द्रीयमन्त्रिणा भाजपाध्यक्षेण जेपी-नड्डा इत्यमुना प्रोदीरितं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे सर्वकारेण प्रदर्शनाधारित-राजनीतिं संस्थाप्य उत्तरदायित्वपूर्णं कर्तव्यपरायण-सर्वकारं प्रदाय देशस्य राजनैतिकसंस्कृतिः परिवर्तिता। मोदी-सर्वकारस्य एकादशवर्षपूर्त्यवसरे नवदिल्ल्यां वार्ताहरान् सम्बोधयन् श्रीनड्डा इत्यमुना कथितं यत् यत् सर्वकारेण देशस्य राजनैतिक-परिदृश्यं परिवर्त्य नूतनोपक्रमः सञ्चालितः।

श्रीनड्डा इत्येषः एनडीए-सर्वकारस्य साहसिक-निर्णयक्षमता प्राशंसयत्।

श्रीनड्डावर्येण आरोपितं यत् चतुर्दशाधिक-द्विसहस्रतमवर्षात् प्राक् प्रशासनानि भ्रष्टाचारलिप्तानि आसन्। सहैव सर्वत्र नकारात्मकतायाः वातावरणम् आसीत्।

भाजपाध्यक्षेण कथितं यत् नरेन्द्रमोदी-सर्वकारेण सबका साथ, सबका विकास, सबका विश्वास और सबका प्रयास इत्येतत् सिद्धान्तमाश्रित्य कार्यं कृतम् । विगते एकस्मिन् दशके सर्वकारेण समाजस्य विविधवर्गेभ्यः कार्यं कृतम्। सहैव सर्वकारेण महिलानेतृत्वयुतस्य विकासदृष्टिकोणस्य समेधनार्थं बलं प्रदत्तम्।

---------------------------------

गोयल-भ्रमणः : १.

वाणिज्योद्योगमन्त्री पीयूषगोयलः अद्य आर्थिकव्यापार-सहभागितां सुदृढीकर्तुं स्विट्जर्लैण्ड्-स्वीडेन्-देशयोः यात्राम् आरब्धवान्। सः द्विपक्षीयव्यापारं निवेशं च वर्धयितुं स्विट्जर्लैण्ड्देशे वैश्विकमुख्यकार्यकारीपदाधिकारिभिः उद्योगनेतृभिः सह मिलिष्यति। मन्त्री स्वीडन-देशे आर्थिक-औद्योगिक-वैज्ञानिकसहकार्यस्य भारत-स्वीडिश-संयुक्तायोगस्य एकविंशतितम-सत्रस्य सहाध्यक्षतां करिष्यति। एषा यात्रा प्रमुख-यूरोपीय-राष्ट्रैः सह सामरिक-आर्थिक-सहभागितां इतोऽपि सुदृढीकर्तुं, सुदृढव्यापार-निवेश-सम्बन्धं च प्रवर्तयितुं, वैश्विक-वृद्ध्यै सह-दृष्टेः समर्थनं कर्तुं च भारतस्य दृढप्रतिबद्धतां रेखांकयति।

---------------------------------

अन्तरिक्षाभियानम्-एक्सिओम्

भारतीयान्तरिक्षयात्री भारतीयवायुसेनायाः समूहनायकः शुभांशुशुक्लः श्वः एक्सिओम्-चतुर्थाभियानान्तर्गतं स्वीयप्रथमायै अन्तरिक्षयात्रायै पूर्णतया सुसन्नद्धो वर्तते। सः सप्ताहद्वयं यावत् अन्ताराष्ट्रियान्तरिक्षस्थानके स्थास्यति। अमेरिकायाः फ्लोरिडायां नासायाः कैनेडी-केन्द्रात् श्वः भारतीयमानकसमयानुसारं सायं द्विपञ्चाशदधिक-पञ्चवादने सः अन्तरिक्षावरोहणं विधास्यति।

आकाशवाण्या सह विशेषसाक्षात्कारे भारतस्य प्रथमान्तरिक्षयात्रिणा राकेशशर्म्मणा शुभांशुशुक्लाय आगामिने अन्तरिक्षाभियानाय शुभकामनाः प्रदत्ताः।

---------------------------------

अन्तरिक्षयात्री-राकेशशर्मा

आकाशवाण्या सह विशेषसाक्षात्कारे भारतस्य प्रथमान्तरिक्षयात्रिणा राकेशशर्म्मणा शुभांशुशुक्लाय आगामिने अन्तरिक्षाभियानाय शुभकामनाः प्रदत्ताः।तेनोदीरितं यत् सः अग्रिमयात्रायै उत्सुकोऽस्ति सहैव तेन भारतस्य अन्तरिक्षाभियानानां उज्ज्वलभविष्यमालक्ष्य विश्वासोऽपि प्रकटितः।

---------------------------------

भारतऋतुविज्ञानविभागः

भारतस्य ऋतुविज्ञानविभागेन हरियाणा-चण्डीगढ- दिल्ली- जम्मू-कश्मीर-लद्दाख-पञ्जाब-राजस्थान-उत्तरप्रदेशेषु च जूनमासस्य एकादशदिनाङ्कपर्यन्तं लू इति तापतरङ्गस्य स्थितेः संभावना प्रकटितास्ति। विभगेनोक्तं यत् पश्चिमबङ्गे, ओडिशायां, तमिलनाडुराज्ये पुडुचेरीराज्ये, बिहारे च अद्य उष्णार्द्रस्थितिः भवितुमर्हति । अगामिषु त्रिदिवसेषु वायव्य-मध्यभारतयोः अधिकतमं तापमानं द्वाभ्यां समेध्य त्रीणि-डिग्री-सेल्सियसमितं भवितुमर्हति तथा च देशस्य अन्येषु भागेषु तापमाने महत्त्वपूर्ण-परिवर्तनं नावलोक्यते विभागेन हरियाणा- दिल्ली- पञ्जाब- पश्चिमराजस्थान- पश्चिमोत्तरप्रदेशयोः च एकान्तस्थानेषु धूलिपूर्णवायोः सम्भावना प्रकटीकृता ।

---------------------------------

इज़राइलसेना-गाज़ा

इज़राइल-सैन्यबलेन अद्य जलवायु-कार्यकर्ता ग्रेटा-थनबर्ग एवं अन्ताराष्ट्रियकार्यकर्तारः यात्रिणश्च निगडिताः। इमे सर्वेऽपि जलपोतमाश्रित्य गज़ायां सहायता-प्रदानाय निर्गताः। फ्रीडम - फ्लोटिला-गठबन्धनेन गज़ायां मानवीयसहायतायै इदमभियानम् आयोजितम् आसीत्।

---------------------------------

अमेरीका विरोध :

कैलिफोर्नियायां व्याप्तस्य आप्रवासन-अभियानस्य विरुद्धं नवीनतम-प्रदर्शनेषु लॉस-एन्जल्स-नगरस्य मध्यभागे सहस्राधिकाः आन्दोलनकारिणः नैशनल गाड्र्स इति राष्ट्रिय-रक्षक-सैनिकैः सह संघर्षं कृतवन्तः। आप्रवासन-सीमाशुल्क-प्रवर्तन-संस्थायाः प्रतिनिधिभिः सह राष्ट्रिय-रक्षक-सैनिकाः जनसमूहं विकीर्णं कर्तुं बहुवारं अश्रु-धूम-ग्रेनेड्-इत्येतयोः प्रहारं कृतवन्तः। अस्मिन् सङ्घर्षे केचन आन्दोलनकारिणः पत्रकाराः च घातिताः। अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः गृहसुरक्षासचिवं रक्षासचिवं च व्यवस्थां पुनः स्थापयितुं सर्वाणि आवश्यकानि कार्याणि कर्तुं निर्देशं प्रदत्तवान्।

---------------------------------

अनिवार्य घोषणा

अद्य रात्रौ सार्द्धनववादने अस्माकं द्विभाषिक लाइव फोन-इन "Public Speak" इत्यस्मिन् कार्यक्रमे वयं योग-आयुर्वेद-विशेषज्ञाभ्यां अनिता कौशिक-कमल-किशोराभ्यां सह शारीरिक-मानसिक-कल्याणाय योगस्य विषये अन्वेषणात्मकं चर्चाम् आनेष्यामः। कार्यक्रमेऽस्मिन् श्रोतारः अस्माकं विशेषज्ञाभ्यां प्रश्नान् प्रष्टुम् शक्ष्यन्ति।

।। इति वार्ता: ।।